मुद्रित पृष्ठ : 3 अनुक्रमांक ......................

**स/1(ब)**

# प्रथमा परीक्षा, 2015

## साहित्य

### प्रथमं प्रश्नपत्रम्

***समयः - घंटात्रयम्*** ***पूर्णाङ्काः - 100***

***( प्रश्नपत्रप्राप्तिसमनन्तरमेव अस्योपरि स्वीयोऽनुक्रमाङ्कः लेख्यः )***

**सूचना :** निम्नाङ्कितेषु **त्रयः** श्लोकाः सन्दर्भप्रसङ्गादि निर्देशपूर्वकं व्याख्येयाः। 36

**1.** (क) शीलं शौचं क्षान्तिर्दाक्षिव्यं मधुरता कुले जन्म।
न विराजन्ति हि सर्वे, वित्तविहीनस्य पुरुषस्य ।।

(ख) प्रतिदिवसं याति लयं वसन्तवाताहतेव शिशिरश्रीः।
बुद्धिर्बुद्धिमतामपि कुटुम्बभरचिन्तया सततम् ।।

(ग) व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना।
कामार्तेनाथ मत्तेन दृष्टः स्वप्नो निरर्थकः।।

P.T.O.

(घ) जीर्यन्ते जीर्यतः केशाः दन्ता जीर्यन्ति जीर्यतः।
चक्षुः श्रोत्रे च जीर्येते तृष्णैका तरुणायते ।।

(ङ) कुपुत्रोऽपि भवेत्पुंसां हृदयानन्दकारकः ।
दुर्विनीतः, कुरूपोऽपि, मूर्खोऽपि, व्यसनी खलः ।।

**2.** अधोलिखितयोः **कस्याप्येकस्य** श्लोकस्य व्याख्या करणीया। 14

(क) तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव
अन्यः क्षणेन भवतीति विचित्रमेतत् ।।

(ख) शूरः सुरूपः सुभगश्च वाग्मी, शस्त्राणि शास्त्राणि विदांकरोतु ।
अर्थं विना नैव यशश्च मानं प्राप्नोति मर्त्योऽत्र मनुष्यलोके ।।

**3.** निम्नलिखितयोरेकस्य गद्यखण्डस्य सप्रसङ्गं व्याख्यां कुरुत। 15

(क) तद्यथाऽनुश्रूयते-अस्ति दाक्षिणात्ये जनपदे पाटलिपुत्रं नाम नगरम् । तत्र मणिभद्रो नाम श्रेष्ठी प्रतिवसति स्मा तस्य च धर्मार्थकाममोक्षकर्माणि कुर्वतो विधिवशाद्धनक्षयः सञ्जातः। ततो विभवक्षयादपमानपरम्परयाः परं विषादं गतः।





(ख) ततो नापितोऽपि स्वगृहं गतः। तत्र च गत्वा खदिरमयं लगुडं सज्जीकृत्य कपाटयुगलं द्वारि समाधाय सार्द्धप्रहरैकसमये भूयोऽपि विहारद्वारमाश्रित्य सर्वान्क्रमेण निष्क्रामतो गुरुप्रार्थनया स्वगृहमानयत् । तेऽपि सर्वे कर्पटवित्तलोभेन भक्तियुक्तानपि परिचितश्रावकान् परित्यज्य प्रहृष्टमनसस्तस्य पृष्ठतो ययुः।

**4.** ब्राह्मणीनकुलकथां सिंहकारकब्राह्मणकथां वा स्वसंस्कृत गिरा लिखत। 15

**5.** अपरीक्षितकारकस्य प्रश्नपत्रातिरिक्तान् दशश्लोकान् लिखत। 20